योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ११९

एकोनविंशाधिकशततमः सर्गः ११९

मनुरुवाच ।

सर्गात्मभिर्विभुः स्पन्दैः क्रीडते बालवत्स्वयम् ।

संहारात्मकशक्त्याथ संहृत्यात्मनि तिष्ठति ।। १

स्वयमस्य तथा शक्तिरुदेत्याबध्यते यया ।

स्वयमस्य तथा शक्तिरुदेत्युन्मुच्यते यया ।। २

चन्द्रार्कवह्नितप्तायोरत्नादीनां यथार्चिषः ।

यथा पत्रादि वृक्षाणां निर्झराणां यथा कणाः ।। ३

तथेदं ब्रह्मणि स्फारे जगद्बुद्ध्यादि कल्पितम् ।

दुःखप्रदमतज्ज्ञानां तदेवातदिव स्थितम् ।। ४

अहो नु चित्रा मायेयं तात विश्वविमोहिनी ।

सर्वाङ्गप्रोतमप्यात्मा यदात्मानं न पश्यति ।। ५

चिदादर्शमयं सर्वं जगदित्येव भावयन् ।

यस्तिष्ठत्युपशान्तेच्छं स ब्रह्मकवचः सुखी ।। ६

अहमर्थविमुक्तेन भावेनाभावरूपिणा ।

सर्वं शून्यं निरालम्बं चिद्रूपमिति भावयेत् ।। ७

इदं रम्यमिदं नेति बीजं ते दुःखसंततेः ।

तस्मिन्साम्याग्निना दग्धे दुःखस्यावसरः कुतः ।। ८

राजन्नभावनास्त्रेण रम्यारम्यविभागिता ।

पौरुषातिशयेनाशु स्वेनैवान्तर्विलूयताम् ।। ९

अभावनेन भावनं विलूय कर्मकाननम् ।

परं समेत्य तानवं विशोक एव तिष्ठ भोः ।। १०

भरितभुवनाभोगो भूत्वा विभागबहिष्कृतो
गलितकलनाभासोल्लासो विवेकविलासवान् ।
अधिगतपरानन्दस्पन्दश्चिराय निरामयः ।
शमसमसितस्वच्छाभोगो भवाभयचिद्वपुः ।। ११

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० इक्ष्वाकुमनुसंवादे एकोनविंशाधिकशततमः सर्गः ।। ११९ ।।